Lesson 36. Introduction to Numbers.

Let's first get introduced to the numerals. Just 1 - 10 for the time being.
Numbers 1, 2, 3 and 4 have different number names for the three genders.
5 onwards, it is all the same.

	M	N	F
१	एकः	एकम्	एका
२	द्वौ	द्वे	द्वे
३	त्रयः	त्रीणि	तिस्रः
४	चत्वारः	चत्वारि	चतस्रः
५	पञ्च		
६	षट्		
७	सप्त		
८	अष्ट	अष्टौ	
९	नव		
१०	दश		

So "three men in a boat" would be translated into त्रयः मनुष्याः नौकायाम्।
Three women on television would be तिस्रः महिलाः दूरदर्शने।
Three fruits in a basket would be त्रीणि फलानि डल्लके। (डल्लकः = basket.)
And we'd have a नव मनुष्याः नव महिलाः नव फलानि च on the seashore
watching the sun set slowly, the sky aflame in a blaze of orange melting
slowly into a deep enduring blue.
Over to Exercise 36 A.....

Lesson 36 A. Exercises with The Numerals 1- 10.

Nouns/ Pronouns	Verbs	Avyayas	Adjectives.
वटवृक्ष banyan tree M			
कमल lotus N			
लेखनी pen F			
अङ्कनी pencil F			
अवकरपेटीका garbage bin F			
मयूर peacock M			
मयूरी peahen F			
विमानयान aeroplane N			
पृष्ठ page N			
अजा female goat F			

Translate:

1. One boy, one girl and one book are on the table.
2. Two monkeys, two leaves and two girls are on the branch of a banyan tree.
3. Three rivers, three mountains and three forests are in the picture.
4. Four trees, four houses and four garlands are in the box.
5. Five lotuses, five poets and five pens are in that pond.
6. Six cups, six televisions and six pencils are in the garbage bin.
7. Seven peacocks, seven peahens and seven aeroplanes are in the sky.
8. Eight men, eight girls and eight friends are singing .
9. Nine girls , nine boys and nine laddoos are in the restaurant.
10. Ten Brahmins, ten pages and ten female goats are in the ashram.

Lesson 36 B. Answers to Lesson 36 A.

Translated:

1. One boy, one girl and one book are on the table.
   एकः बालकः, एका बालिका, एकं पुस्तकं च उत्पीठिकायां सन्ति।

2. Two monkeys, two leaves and two girls are on the branch of a banyan tree.
   द्वौ वानरौ , द्वे पत्रे , द्वे बालिके च वटवृक्षस्य शाखायां सन्ति।

3. Three rivers, three mountains and three forests are in the picture.
   तिस्रः नद्यः , त्रयः पर्वताः, त्रीणि वनानि च चित्रे सन्ति।

4. Four trees, four houses and four garlands are in the box.
   चत्वारः वृक्षाः, चत्वारि गृहाणि , चतस्रः मालाः च पेटिकायां सन्ति।

5. Five lotuses, five poets and five pens are in that pond.
   पञ्च कमलानि, पञ्च कवयः, पञ्च लेखन्यः च तस्मिन् तडागे सन्ति।

6. Six cups, six televisions and six pencils are in the garbage bin.
   षट् चषकाः, षट् दूरदर्शनानि, षट् अङ्कन्यः च अवकरपेटिकायां सन्ति।

7. Seven peacocks, seven peahens and seven aeroplanes are in the sky.
   सप्त मयूराः, सप्त मयूर्यः,सप्त विमानयानानि च आकाशे सन्ति।

8. Eight men, eight girls and eight friends are singing .
   अष्ट मनुष्याः , अष्ट बालिकाः, अष्ट मित्राणि च गायन्ति।

9. Nine girls , nine boys and nine laddoos are in the restaurant.
   नव बालिकाः, नव बालकाः, नव मोदकानि च उपाहारगृहे सन्ति।

10. Ten Brahmins, ten pages and ten female goats are in the ashram.
    दश ब्राह्मणाः, दश पृष्ठानि, दश अजाः च आश्रमे सन्ति।

From Our Library. Lesson 36 C. The story of the elephant and the gardener.

Nouns/ Pronouns	Verbs	Avyayas	Adjectives.
sale M विक्रय course of action M क्रम	to return प्रति + नि +वृत् प्रतिनिवर्त् 1. A.P.	always अव्याहतम् as always यथाक्रमं	many coloured विविधवर्ण
occupation M उद्यम		while यावत्	alarmed चकित
mind N चित्त		truly ननु	muddy कर्दमयुक्त
friendship N सख्य joke N परिहास		at that time तदानीम्	
Coming N आगमन		suddenly अकस्मात्	
trunk of an elephant F शुण्डा needle F सूची		सौहार्दपूर्णं In a friendly spirit.	

Note: न एतावत्.....अपि तु This phrase is used in Sanskrit in the sense-----'not only.....but also.'

गजस्य मालाकारस्य च कथा।

कस्मिंश्चित् नगरे वसति स्म देवदत्तः नाम मालाकारः। विविधवर्णानां सुगन्धीनां च कुसुमानां विक्रयः तस्योद्यमः(तस्य उद्यमः)। तस्य वाणी मधुरा , सौहार्दपूर्णं चित्तं, व्यवहारः प्रेममयः चासीत्(च आसीत्)। तेनैव (तेन एव) नगरस्थाः बालिकाः बालकाः च सर्वे अपि जनाः तस्मिन् स्निह्यन्ति स्म। नैतावत् (न एतावत्) अपि तु तस्मिन् नगरे प्रख्यातस्य गणेशमन्दिरस्यासीत्(गणेशमन्दिरस्य आसीत्) सुबुद्धिः नाम गजः। तेनापि (तेन अपि) सहैतस्यासीत्(सह एतस्य आसीत्) सख्यम्।
सः गजः प्रतिदिनं तेनैव मार्गेण नद्याः वारिणि स्नानार्थं गच्छति स्म। आगमनकाले देवदत्तस्यापणे (देवदत्तस्य आपणे) तिष्ठति। देवदत्तः अपि स्नेहेन सुगन्धीनां पुष्पाणां मालाभिः तं भूषयति। तेन सन्तुष्टः सुबुद्धिः शुण्डया तम् अभिवन्दते च। एवम् एषः क्रमः अव्याहतं सुदीर्घं कालं यावत् प्रचलति।
एकस्मिन् दिवसे मालाकारः चिन्तयति यत्—" ननु, अद्यैतस्य सुबुद्धेः परिहासं करोमीति (करोमि इति)। " तस्मिन् दिवसे सुबुद्धिः यथाक्रमं देवदत्तस्यापणं समागच्छति। तदानीं सः अकस्मात् गजस्य शुण्डां सूच्या पीडयति। वेदनेन पीडितः सुबुद्धिः स्वशुण्डां प्रतिसंहरते। तदा जनाः तम् उपहसन्ति। दुःखितः सः नदीं गच्छति। स्नात्वा कर्दमयुक्तं वारि शुण्डया आनयति। तत् वारि अकस्मात् एव मालाकारस्यापणे प्रक्षिपति। तेन वारिणा सर्वाः मालाः पुष्पाणि च मलिनानि भवन्ति नश्यन्ति च। एतेन देवदत्तः अन्ये च चकिताः जनाः आत्मानं (themselves) निन्दन्ति। सुबुद्धिः प्रतिनिवर्तते। पुनः कदापि तस्यापणं नैव गच्छति।

****

Lesson 37. Time.

Do you ever get this feeling that Time seems to rule our lives? Nothing and i mean NOTHING gets done without one eye on the clock. (And if Darwin's theory of evolution is right, it beats me why the human race is not squint eyed.)

How to read time.

Without much preamble, first, let me give you the words for the hour....
1 o'clock. एकवादनम्
2 o'clock. द्विवादनम्
3 o'clock. त्रिवादनम्
4 o'clock. चतुर्वादनम्
5 o'clock पञ्चवादनम्
6 o'clock. षट्वादनम्
7 o'clock. सप्तवादनम्
8 o'clock. अष्टवादनम्
9 o'clock. नववादनम्
10 o'clock. दशवादनम्
11 o'clock. एकादशवादनम्
12 o'clock. द्वादशवादनम्

These forms become neuter and singular and will go like वनम्, therefore.....
I go to school at 7 o'clock. अहं सप्तवादने विद्यालयं गच्छामि।

Now the words for--- the quarter past सपादवादनम्, half past सार्धवादनम्, quarter to पादोनवादनम्...

Add them to the hour like this....
5: 15 सपादपञ्चवादनम्
6:30 सार्धषट्वादनम्
8:45 पादोननववादनम् (a quarter to nine.)

And the rest.....
5 minutes past पञ्चाधिक
10 minutes past दशाधिक
20 minutes past विंशत्यधिक
25 minutes past पञ्चविंशत्यधिक

5 minutes to पञ्चोन
10 minutes to दशोन
20 minutes to विंशत्युन
25 minutes to. पञ्चविंशत्युन

Here's how you add them to the hour:

5 minutes past 9 पञ्चाधिकनववादनम्
10 minutes past 9 दशाधिकनववादनम्
20 minutes past 9 विंशत्यधिकनववादनम्
25 minutes past 9 पञ्चविंशत्यधिकनववादनम्

5 minutes to 9 पञ्चोननववादनम्
10 minutes to 9 दशोननववादनम्
20 minutes to 9 विंशत्युननववादनम्
25 minutes to 9 पञ्चविंशत्युननववादनम्

Since you will use the words for time only in the locative case... the सप्तमी विभक्ति, you will have sentences like this...
I play in the park at 5: 15 in the evening. सपादपञ्चवादने सायंकाले अहं उद्याने क्रीडामि।

That's fairly simple isn't it? It helps you describe your daily routine, your दिनचर्या, rather accurately...second for second.

Now how about a list of time related stuff?

संस्कृत	हिन्दी	English
घटिका	घडी	Watch / Clock
विकला	सैकिण्ड	Second
कला	मिनट	Minute
होरा	घण्टा	Hour
दिवसः	दिन	Day
रात्रिः	रात	Night
प्रातः	सुबह	Morning
सायम्	सायं	Evening
पूर्वाह्नम्	पहला प्रहर	Before Noon
अपराह्नम्	दूसरा प्रहर	After Noon
मध्याह्नम्	दोपहर	Noon
अर्धरात्रिः	आधी रात	Midnight
ब्रह्ममुहर्तम्	ब्रह्म मुहूर्त	Early morning
सप्ताहः	सप्ताह	Week
पक्षः	पक्ष	Fort night
कृष्णपक्षः	कृष्णपक्ष	The dark fortnight. The fortnight of the waning moon.
शुक्लपक्षः	शुक्लपक्ष	The bright fortnight. The fortnight of the waxing moon.
वर्षः	साल, वर्ष	Year
अवधि	समय	Time
वादनम्	बजे	o'clock.

With that we can start with the exercises related to time.

Appetizer Lesson 37 A. Working with Time.

A. Translate:

Nouns/ Pronouns	Verbs	Avyayas	Adjectives
अल्पाहार breakfast M		खादनार्थं to eat	श्रमपूर्णः - र्णम् - र्णा filled with hard work
सूर्य्योदय sunrise M		पेयार्थं to drink	
वृषभ bullock M		प्रतिप्रातःकालं every morning	
पोलिका chapati F		अनन्तरं after (to be used with the पं० वि०)	
पलाण्डु onion M		प्राक् before (पं० वि)	
वटवृक्ष banyan tree M		सभोजनं with lunch.	
विश्राम rest M			
खाद्य food N			

The farmer.

Madhav is a farmer. His life is filled with hard work. He wakes up everyday at Brahma-muhurt. Having taking his bath and doing his japa and pooja, Madhav eats breakfast at 6: o'clock . Every morning, he goes to the field after sunrise. Before noon, he plows the field with the help of two bullocks. At noon, his wife, Malini, comes to the field with lunch. He eats only two chapatis and an onion. In the afternoon, he rests under the banyan tree for some time and then works again.

In the evening, at 5: 15, he washes his bullocks and gives them time to rest. At 6:30 he gives his bullocks food to eat and clean water to drink. At 5 minutes to 7, he comes back home. After having washed his face, hands and feet, he prays to the Lord. At 7: 45, he eats his dinner. In the night, at 8:25, he goes to sleep.

B. How about trying out similar compositions on topics of your own?

Appetizer Lesson 37 B. Answers to Lesson 37 A.

The farmer. कृषकः

Madhav is a farmer. His life is filled with hard work.
माधवः एकः कृषकःअस्ति। तस्य जीवनं श्रमपूर्णम्।

He wakes up everyday at Brahma-muhurt.
प्रतिदिनं सः ब्रह्ममुहूर्ते उत्तिष्ठति।

Having taken his bath and doing his japa and pooja, Madhav eats breakfast at 6: o'clock.
स्नात्वा, जपं कृत्वा, पूजयित्वा, माधवः तस्य अल्पाहारं षट्वादने खादति।

Every morning, he goes to the field after sunrise.
प्रतिप्रातःकालं, सूर्य्योदयात् अनन्तरं सः क्षेत्रं गच्छति।

Before noon, he plows the field with the help of two bullocks.
मध्याह्नात् प्राक् , वृषभयोः साहाय्येन सः क्षेत्रं कर्षति।

At noon, his wife, Malini, comes to the field with his lunch.
मध्याह्ने , तस्य भार्या मालिनी, सभोजनं क्षेत्रं आगच्छति।

He eats only two chapatis and an onion.
सः केवलं द्वे पोलिके, एकं पलाण्डुं च खादति।

In the afternoon, he rests under the banyan tree for some time and then works again.
अपराह्ने सः वटवृक्षस्य अधः किञ्चित कालार्थं विश्रामं कृत्वा पुनः कार्यं करोति।

In the evening, at 5: 15, he washes his bullocks and gives them time to rest.
सायंकाले, सपादपञ्चवादने, सः वृषभौ प्रक्षालयति, ताभ्यां विश्रामार्थं समयं यच्छति च।

At 6:30 he gives his bullocks food to eat and clean water to drink.
सार्धषट्वादने सः वृषभाभ्यां खादनार्थं खाद्यं , पेयार्थं स्वच्छं जलं च यच्छति।

At 5 minutes to 7, he comes back home.
पञ्चोनसप्तवादने सः पुनः गृहम् आगच्छति।

After having washed his face, hands and feet, he prays to the Lord.
मुखहस्तपादप्रक्षालनं कृत्वा , सः देवं नमति।

At 7: 45, he eats his dinner.
पादोनअष्टवादने सः भोजनं करोति।

In the night, at 8:25, he goes to sleep.
रात्रौ, पञ्चविंशत्यधिकअष्टवादने , सः निद्रां करोति।

From Our Library. Lesson 37 C. " Become A Mouse Again! "

Nouns/ Pronouns	Verbs	Avyayas	Adjectives
तपोवन forest N	आक्रुश्(आक्रोश्) 1. P.P. to cry out.	दीनम् pitiably	
मूषक rat M	उप + गम् (उपगच्छ्) 1. P.P. to go near		
वायस crow M	अभि + धाव् 1. P. P. to attack		
मार्जार cat M	शप् 1 U. P. to curse		
कुक्कुर dog M	अव + गम्(अवगच्छ्) 1 P. P. to understand		
आत्मन् oneself	उप + आ+ गम् (उपागच्छ्) 1. P. P. to come near		

पुनः त्वं मूषकः भव ।

एकस्मिन् (in one) तपोवने कः अपि मुनिः वसति स्म । एकदा सः स्नानार्थं नदीं गच्छति । तदा कस्यचित् (of some)काकस्य मुखे सः मूषकं पश्यति । सः मूषकः दीनम् आक्रोशति स्म " रक्ष माम्
इति ।" तदा सः ऋषिः वायसं प्रति पाषाणं क्षिपति। काकस्य मुखात् मूषकः पतति । मुनिः मूषकम् आश्रमम् आनयति पालयति च । कदाचित् भयाकुलः मूषकः मुनिम् उपगच्छति ।मुनिः पृच्छति, " वद, कस्मात् तव भयम् ?" इति । "मार्जारात्" इति मूषकः कथयति । मुनिः वदति, "गच्छ, त्वम् अपि मार्जारः भव, सुखेन क्रीड, चिरं जीव च " इति । तदा निर्भयः सः मार्जारः सुखेन विहरति ।
अथ अनन्तरम्, एकः कुक्कुरः तं मार्जारम् अभिधावति । तदा सः मार्जारः पुनः मुनिम् उपगच्छति वदति च
" अधुना कुक्कुरः मम भयकारणम्" इति । मुनिः वदति " गच्छ, त्वम् एव कुक्कुरः भव , परिरक्ष च आत्मानम्" इति । ततः कः अपि व्याघ्रः तं कुक्कुरम् अभिधावति । सः व्याघ्रभयेन

मुनिं शरणं गच्छति पृच्छति च " वदतु कथं रक्षाणि आत्मानम् इति । मुनेः आशीर्वादेन सः व्याघ्रं भवति | तेन आनन्दितः सः व्याघ्रः सर्वत्र विहरति ।

अथ जनाः तं पश्यन्ति वदन्ति च " पश्यत भोः एतं व्याघ्रं, पूर्वम् एषः मूषकः एव " इति । ततः क्रुद्धः सः व्याघ्रः जनान् प्रति धावति वदति च " व्याघ्रः एवाहम् " इति । जनाः वदन्ति — " यदि त्वं व्याघ्रः तर्हि भक्षय एतं मुनिम्। पश्याम तव अपि सामर्थ्यम् " इति । व्याघ्रः " तथा " इति वदति मुनिम् अभिधावति च । मुनिः तपोबलेन मूषकस्य हेतुम् अवगच्छति । क्रुद्धः सः " पुनः त्वं मूषकः भव " इति शपति । तदा एव सः मूषकः भवति, अनुभवति च अविवेकस्य फलम् ।

***

Lesson 38. Relatively speaking.

Have a look at our Supplement 26. It's obvious, isn't it, that we are a family oriented lot? A word for just every member of a HUGE extended family.

Except for the ऋकारान्त words, which you have still to learn, the rest are easily declinable. Supplement 27, tells you how to decline मातृ , पितृ and the rest.

Masculine Words that are declined like पितृ father... भ्रातृ brother , जामातृ son -in -law , देवृ Husband's brother , नृ man .

Feminine Words that are declined like मातृ mother.. दुहितृ (daughter) , यातृ (husband's brother's wife.) ननान्दृ (husband's sister), स्वसृ (sister.)

Masculine Words that are declined like कर्तृ .... doer, भर्तृ one who bears or carries or maintains; husband, नेतृ leader, अभिनेतृ actor, हर्तृ one who seizes and takes away, रक्षितृ one who protects, सवितृ the Sun, श्रोतृ one who listens , वक्तृ one who speaks, दातृ one who gives , विधातृ a granter, a giver, a creator; Brahma.
These words are like adjectives ...convert them into a कत्री , नेत्री, अभिनेत्री etc and the whole lot can be made into feminine forms to be declined like नदी ।
If you want to convert them into neuter forms , the words कर्तृ, वक्तृ , धातृ ... a protector. etc will be declined like नेतृ ...eye .

All of this is just for your information. The exercises will deal with just dear ol' Mom and Dad.

****

Appetizer Lesson 38 A. Exercising with Relatives.

Translate.

1. I went with my mother to the temple which is on the bank of the river Kaveri.
2. The policeman told my father that the thief ran away.
3. My father's name is Krishnanand.
4. My mother's spectacles are on her nose.
5. I bow down to my father and my mother in the morning.
6. I love my father and my mother.
7. I gave my mother a fruit.
8. My mother is a teacher.
9. My father is a teacher too.
10. My father's brother went with my father to the garden for a walk in the evening.

Appetizer Lesson 38 B. Answers to Lesson 38 A.

Translated.

1. I went with my mother to the temple which is on the bank of the river Kaveri.
   मम मात्रा सह अहं मन्दिरम् अगच्छं यत् कावेरीनद्याः तटे अस्ति ।

2. The policeman told my father that the thief ran away.
   नगररक्षकः मम पित्रे अकथयत् यत् चोरः अधावत् इति ।

3. My father's name is Krishnanand.
   मम पितुः नाम कृष्णानन्दः।

4. My mother's spectacles are on her nose.
   मम मातुः उपनेत्रं तस्याः नासिकायाम् अस्ति ।

5. I bow down to my father and my mother in the morning.
   प्रातःकाले अहं मम पितरं मातरं च नमामि ।

6. I love my father and my mother.
   अहं मम पितरि मम मातरि च स्निह्यामि ।

7. I gave my mother a fruit.
   अहं मम मात्रे फलम् अयच्छम् ।

8. My mother is a teacher.
   मम माता अध्यापिका अस्ति ।
9. My father is a teacher too.
   मम पिता अपि अध्यापकः अस्ति ।
10. My father's brother went with my father to the garden for a walk in the evening.
    मम पितृव्यः मम पित्रा सह भ्रमणार्थम् उद्यानम् अगच्छत् ।

From Our Library. Lesson 38 C. You and I are One.

Nouns/ Pronouns	Verbs	Avyayas	Adjectives.
name N नामधेय	भण् भणति 1. P.P. to speak		शक्यः- क्या - क्यम् possible
proof N प्रमाण			व्यथितः - ता - तम् depressed, hurt
prose N गद्य			सस्मितः - तं - ता smiling
poetry N पद्य			
alternate prose and poetry. N गद्यपद्य			

त्वम् एवाहम्।

एकदा कः अपि पण्डितः महाकविं कालिदासं प्रति गच्छति। सः वदति — " हे महाकवे , महाकविषु तव नामधेयं नास्ति " इति। महाकविः कालिदासः तं पृच्छति " कथम् एतत् शक्यम् ? यदि मम नाम तत्र नास्ति तर्हि के महाकवयः ? " इति ।
सः पुरुषः वदति , " महर्षिः वाल्मीकिः आदिकविः। तस्य रामायणं नाम महाकाव्यं लोकेषु प्रसिद्धम्। द्वितीयः महाकविः महर्षिः व्यासः अस्ति। सः विशालबुद्धिः। महाभारतं नाम महाकाव्यं तस्य विशालबुद्धेः प्रमाणम्। तृतीयः महाकविः दण्डी। तस्य महाकवेः "दशकुमारचरितम्" नाम गद्यपद्यं प्रसिद्धम् इति।
महाकविः कालिदासः एतत् आकर्णयति। तेन च सः व्यथितः भवति। सः चिन्तयति , "एतस्य कारणम् अहं देवीं शारदाम् एव पृच्छामि " इति।
सः देव्याः शारदायाः मन्दिरं गच्छति। सः देवीं पृच्छति, " हे देवि, वाल्मीकिः आदिकविः। व्यासः समर्थः ऋषिकविः। एतौ महाकवी श्रेष्ठौ। अधुना जनाः " दण्डी एव कविः" इति वदन्ति। यदि एते एव महाकवयः प्रसिद्धाः तत् कः अहम् ?" सस्मिता देवी तं महाकविं भणति , " त्वम् एवाहम् " इति। तेन महाकविः कालिदासः प्रसन्नः भवति।

****

Lesson 39. Frequently used Avyayas.

Just run through Supplement 28. (Yup, it's a trimmed one!) i did not know what i was getting myself into when i started to begin on this lesson.....landed up with a huge number of avyayas and then sat with a pen in my hand to bring down the number to a more palatable size.....

The list is for your reference. Let's just work on a few at a time. Today's will be the use of the ones that are generally used as a couple:

1. चेत् ..... नो चेत् If so..... if not. यदि सः अस्ति चेत् अहम् आगच्छामि नो चेत् श्वः मिलामः ।
2. यदि..... तर्हि If.....then यदि सः आगच्छति तर्हि अहम् आगच्छामि ।
3. यथा ..... तथा As.....like यथा रामः आचरति तथा आचरतु ।
4. यदा..... तदा When... then यदा मेघाः गर्जन्ति तदा मयूराः नृत्यन्ति ।
5. यावत् .... तावत् As long as....till that time यावत् पर्यन्तं सः न आगच्छति, तावत् पर्यन्तम् अहम् अत्र एव तिष्ठामि ।
6. यद्यपि .....तथापि Even if , then also यद्यपि सः प्रयत्नं करोति, तथापि सः साफल्यं न प्राप्नोति ।

That's quite enough to begin with. Over to Exercise 39A.

Appetizer Lesson 39 A. Avyaya Couples.

Translate using the correct Avyaya pair: (By now i hope you will have seen how difficult it is to translate word for word..... trust your instincts to come up with a good "Sanskrit-like" sentence.)

1. As long as the rain falls, I am not going out of my house.
2. If she is going to the party (सम्भोजनम्)), I am not coming.
3. Even if she goes to the party, are you going ?
4. Alright(अस्तु), if you are going, I will come too, otherwise I am staying home.
5. I do not have faith in her. She is not as she behaves.
6. If I tell her a secret, then with certainty everybody(Check Supplement 29.)will know.

   (translate this in the present tense since we still have to learn how to conjugate verbs in the future tense.)
7. When you meet her, then do not tell her that I have talked about her to you.
8. As long as she does not talk to me, I am happy.
9. If she asks you what I have said, tell her that I have talked about her good nature.
10. Even if she is my sister's friend, I do not trust her.(better translated as ...my trust is not in her.)

Can't get any gossipier than this, can it??

Appetizer Lesson 39 B. Answers to Lesson 39 A.

You will NOT, i repeat, NOT, tell the world that i taught you how to gossip in Sanskrit. (i have a reputation to protect, you know.)

1. As long as the rain falls, I am not going out of my house.
यावत् पर्यन्तं वर्षा पतति , तावत् पर्यन्तम् अहं मम गृहात् बहिः न गच्छामि ।
2. If she is going to the party, I am not coming.
यदि सा सम्भोजनं गच्छति , तर्हि अहं न आगच्छामि ।
3. Even if she goes to the party, are you going ?
यद्यपि सा सम्भोजनं गच्छति , तथापि त्वं गच्छसि किम् ?
4. Alright, if you are going, I will come too, otherwise I am staying home.
अस्तु, यदि त्वं गच्छसि, तर्हि अहम् अपि आगच्छामि, नो चेत् अहं गृहे तिष्ठामि ।
5. I do not have faith in her. She is not as she behaves.
मम श्रद्धा तस्यां नास्ति । यथा सा अस्ति , तथा सा न आचरति ।
6. If I tell her a secret, then with certainty everybody will know.
यदि अहं तस्यै रहस्यं कथयामि, तर्हि निश्चयेन, सर्वे जानन्ति ।
7. When you meet her, then do not tell her that I have talked about her to you.
यदा त्वं तां मिलसि तदा तस्यै मा कथय यत् तस्यां विषये अहं त्वां अवदम् ।
8. As long as she does not talk to me, I am happy.
यावत् पर्यन्तं सा मां न वदति, तावत् पर्यन्तम् अहं सन्तुष्टा / सन्तुष्टः अस्मि ।
9. If she asks you what I have said, tell her that I have talked about her good nature.
यदि सा त्वां पृच्छति यत् अहं किम् अवदम् ,तर्हि तस्यै कथय यत् तस्याः सुस्वभावस्य विषयम् अहम् अवदम् ।
10. Even if she is my sister's friend, I do not trust her.
यद्यपि सा मम भगिन्याः सखी अस्ति , मम विश्वासः तस्यां नास्ति ।

From our Library. Lesson 39 C. The aping monkeys.

Nouns/ Pronouns	Verbs	Avyayas	Adjectives
शिरस्त्रविक्रीय cap-seller M		ऊर्ध्वम् up	अनुकरणशीलः - लं-ला imitating
अरण्य forest N शिरस्त्र cap N		पार्श्वे next to.	श्रान्तः - तं - ता tired
शिरस् head (शिरसि is the locative सप्तमी ...on the head.) N पाषाणखण्ड stone M उपाय plan M			व्यतीतः- तं - ता passed, went by. जागरितः - ता -ता awake चकितचकितः - तं - ता greatly alarmed
			निजः - जं - जा one's own

अनुकरणशीलाः वानराः।

आसीत् एकः शिरस्त्रविक्रीयः। माधवः तस्य नाम । एकदा माधवः नगरं अगच्छत्। तत्र सः शिरस्त्राणां क्रेयणम् अकरोत्। तेषां विक्रयार्थं (to sell)सः ग्रामात् ग्रामम् अभ्रमत्। मार्गे अरण्यम् आसीत्। माधवः भ्रमणेन श्रान्तः अभवत्। श्रमपरिहारार्थं (to get rid of his tiredness) सः एकस्य वृक्षस्य अधः आसीदत्। शिरस्त्रपेटिकां पार्श्वे अस्थापयत् सः शयनम् अकरोत् च । तदा तस्य शिरसि एकं शिरस्त्रम् आसीत्।

वृक्षे वानराः आसन्। एकः वानरः अधः अवारोहत्। शिरस्त्रपेटिकां कुतूहलात् उदघाटयत्। एकं शिरस्त्रं हस्तेन अधरत्। शिरसि अस्थापयत्। पुनः वृक्षम् आरोहत्।

अन्ये वानराः तत् अपश्यन्। यथा प्रथमः वानरः अकरोत् तथा एव ते अपि अकुर्वन्। समयः व्यतीतः। माधवः जागरितः अभवत्। पार्श्वे अपश्यत्। चकितचकितः अभवत्। पेटिकायाम् एकम् अपि शिरस्त्रं नासीत्। माधवः ऊर्ध्वम् अपश्यत्। तत्र वानराः आसन्। प्रत्येकस्य शिरसि शिरस्त्रम् आसीत्।

सः वानरान् दण्डम् अदर्शयत्। वानराः वृक्षशाखाः अदर्शयन्। माधवः पाषाणखण्डम् अक्षिपत्। वानराः फलानि अक्षिपन्। माधवः अचिन्तयत्, " किं करोमि? वानराः अनुकरणशीलाः ..... यथा अहं करोमि तथा एव ते कुर्वन्ति। एकः एव उपायः अस्ति।" इति।

सः निजं शिरस्त्रं भूमौ अक्षिपत्। तदा सर्वे वानराः अपि निजानि शिरस्त्राणि भूमौ अक्षिपन्। सत्वरं माधवः सर्वाणि शिरस्त्राणि समानयत्। पेटिकायाम् अस्थापयत्। ततः शीघ्रम् अगच्छत्।

****

Lesson 40. The Moon on my Head.

How else can i ensure that you click onto my lessons? i ***have*** to concoct titles that place me amongst the Gods.

Time to work on our अस् ending words.

The masculine nouns, which will go like चन्द्रमस् the moon, will include
दिवौकस् the one who lives in the heavens.... God,
वेधस् Brahma, the Creator,
दुर्वासस् The Rishi Durvasa,
वनौकस् The One who lives in the forest .... a Rishi.
The feminine words like उषस् (dawn) , and अप्सरस् (Apsara... Heavenly nymphs) are also declined like चन्द्रमस् ।

The neuter nouns, which will go like पयस् (meaning both water and milk), will include words like

मनस् mind
शिरस् head
वचस् speech
तेजस् Brightness/ Splendour
यशस् fame
नभस् sky
तमस् darkness
सरस् lake
वासस् cloth
वयस् age

Certain neuter words are declined in a slightly different manner. Our standard for this set is धनुस् meaning "a bow"... as in an arrow and bow. Words that will be declined like it are:

आयुस् age,
चक्षुस् eye
वपुस् body

The word श्रेयस् is an adjective. It means " better than". This is declined in a different manner. The masculine will go like श्रेयस् , the feminine like नदी and the neuter like पयस् ।
कनीयस् , कनीयसी , कनीयस्. youngest
गरीयस् , गरीयसी, गरीयस्... oldest
ज्यायस् , ज्यायसी, ज्यायस् ...eldest
प्रेयस् , प्रेयसी, प्रेयस्... loved.
So we need to only have the masculine declined words in our Supplement.

Whenever you come across these अस् ending words, you can look up Supplement 30, to figure out what they mean. Our exercises will only deal with the simple, commonly used words like moon, head, mind etc.

****

Lesson 40 A. Exercises with the अस् ending words

Translate the following story. (Absolutely untrue and NOT from our Puranas.)

Nouns/ Pronouns	Verbs	Avyayas	Adjectives.
लोक world M	वृ वारयति to drive away	शीतयितुम् to cool	
सृष्टि creation F	याच् 1. A.P. to beg	ऋते except for	
सवितृ Sun M	गुह् गूहति-ते 1. U.P. to hide.		
शान्ति peace F			
शशक rabbit M			
क्षमा forgiveness F			

1. The Creator looked down at His three worlds (निजलोकत्रयम्।).
2. He called all the inhabitants of the heavens, " Come Gods, see my creation.
3. This creation arose from my mind.
4. See the Moon and the Sun .
5. That is the Sun.
6. See how he drives away the darkness!
7. That is the Moon.
8. With the Moon's light, peace enters people's minds.
9. On the Moon lives a rabbit.
10. Nothing lives on the Sun.
11. When it is dawn, Apsaras play in the clouds.
12. With their clothes, they hide the Sun and Moon.
13. Then there is nothing but darkness.
14. With this, Durvasa becomes angry with the Apsaras.
15. The Rishis of the forest and the Apsaras beg him for forgiveness.
16. They give him water from that lake and cow's milk to cool his anger.
17. The three worlds (लोकत्रयम्) are in the sky. (Remember the Ganesh story 32 C ?)
18. To those who write about the Sun, the Moon and the three worlds, I will give fame."

Lesson 40 B. Answers to Lesson 40 A.

1. The Creator looked down at His three worlds.
वेधाः अधः अपश्यत् निजलोकत्रयम्।

2. He called all the inhabitants of the heavens, " Come Gods, see my creation.
सः दिवौकसः आह्वयत्, " आगच्छन्तु देवाः (दिवौकाः), पश्यन्तु मम सृष्टिम्।"

3. This creation arose from my mind.
एषा सृष्टिः मम मनसः उदभवत्।

4. See the Moon and the Sun .
पश्यन्तु चन्द्रमसं सवितारं च।

5. That is the Sun.
सः सविता।

6. See how he drives away the darkness!
पश्यन्तु कथं सः तमः वारयति !

7. That is the Moon.
सः चन्द्रमाः।

8. With the Moon's light, peace enters people's minds.
चन्द्रमसः प्रकाशेन , शान्तिः जनानां मनांसि विशति।

9. On the Moon lives a rabbit.
चन्द्रमसि एकः शशकः वसति।

10. Nothing lives on the Sun.
सवितरि किमपि न जीवति।

11. When it is dawn, Apsaras play in the clouds.
यदा उषाः अस्ति , अप्सरसः मेघेषु क्रीडन्ति ।

12. With their clothes, they hide the Sun and Moon.
तासां वासोभिः ताः सवितारं चन्द्रमसं च गूहन्ति ।

13. Then there is nothing but darkness.
तदा तत्र किमपि नास्ति तमसः ऋते ।

14. With this Durvasa becomes angry with the Apsaras.
एतेन दुर्वासःअप्सरोभ्यः कुप्यति ।

15. The rishis of the forest and the Apsaras beg him for forgiveness.
वनस्य वनौकाः (ऋषयः) अप्सरसः च तं क्षमां / क्षमायै याचन्ते ।

16. They give him water from that lake and cow's milk to cool his anger.
ते तस्य क्रोधनं शीतयितुम् तस्मात् सरसः पयः, धेनोः पयः च तस्मै यच्छन्ति ।

17. The three worlds are in the sky.
लोकत्रयम् नभसि अस्ति ।

18. To those who write about the Sun, the Moon and the three worlds, I will give fame."
ये सवितुः चन्द्रमसः लोकत्रयस्य च विषये लिखन्ति, अहं तेभ्यः यशः यच्छामि ।

****

From Our Library. Lesson 40 C. Devayani.

Nouns/ Pronouns	Verbs	Avyayas	Adjectives.
कपट deceit N उदर stomach N	मृ म्रिय् 6 A.P. die.	अन्तिकम् into the presence of	
वध murder M उपाय method M	अव + गम् 1.P.P. to know/understand.	परं but	
संप्रदाय tradition M	स्पृह् 10 U.P. to like		
पराभव disappearance / dissolution M	दह् 1 P.P. to burn. रुच् 1 A.P. to like.		

देवयानी

देवयानी दैत्यानां गुरोः शुक्राचार्यस्य पुत्री । सा शुक्राचार्यस्य एकाकिनी सुता । अतः सा पितुः प्रिया । देवानां गुरुः बृहस्पतिः । बृहस्पतेः पुत्रः कचः । देवदानवानां युद्धं भवति । बहवः देवाः रणे म्रियन्ते ।दैत्याः अपि म्रियन्ते । किन्तु सञ्जीवन्याः प्रभावेण दैत्याः पुनः जीवन्ति । अतः देवाः सञ्जीवनीम् इच्छन्ति ।कचः शुक्राचार्यस्य अन्तिकं गच्छति । सः शुक्राचार्यं विद्यादानाय याचते । शुक्राचार्यः कपटम् अवगच्छति ।सः कचाय सञ्जीवनीं न यच्छति ।परं दैत्याः कचात् भीताः । ते कचस्य वधोपायं (वध + उपाय) चिन्तयन्ति ।ते कचस्य वधं कुर्वन्ति ।देवयानी कचे स्निह्यति तस्मै स्पृहयति च ।शुक्रः कचाय जीवदानं यच्छति । क्रुद्धाः दैत्याः पुनः कचस्य वधं कुर्वन्ति तं दहन्ति च । शुक्राय वारुणी रोचते ,अतः दैत्याः वारुण्या मिश्रितां कुर्वन्ति । तां वारुणीं शुक्रः पिबति । देवयानी कचम् आह्वयति। शुक्राचार्यः ध्यायति । सः कचं स्वोदरे पश्यति ।सः सञ्जीवनीं जपति ।कचः तस्य उदरात् बहिः आगच्छति । शुक्रः म्रियते । कचः सञ्जीवनीं जपति ।शुक्रः च पुनः जीवति, परन्तु देवाः सञ्जीवनीं लभन्ते ।वारुण्या शुक्रस्य नाशः भवति । अतःतस्य संप्रदायः अपि पराभवं गच्छति ।

Note: स्पृह् and रुच् both are used with the चतुर्थी विभक्ति ....but in different ways. Whoever/whatever one स्पृह् s, falls into the चतुर्थी विभक्ति and the one who does the liking falls into the प्रथमा विभक्ति ।

When using रुच् , the one who does the liking falls into the चतुर्थी विभक्ति and that which is liked falls into the प्रथमा विभक्ति ।

Summing Up Month 8.

This has been some month! Lots of new concepts and ideas. Trust that you have not had trouble keeping pace.
By the end of Month 8 you would know...

1. Numbers 1-10.
2. How to use Time related words.
3. How to decline the ऋकारान्त words
4. How to use Avyaya pairs
   And
5. How to use the अस् ending words.

The lessons in this month will help you use Sanskrit as a means of conversation. Keep in touch with our Stories and Subhashitas. They are meant to add to your understanding.